# shrIrAdhAstutiH

# श्रीराधास्तुतिः

## Document Information

Text title : rAdhAstutiH 1

File name : rAdhAstuti.itx

Category : devii, rAdhA, devI

Location : doc_devii

Transliterated by : NA

Proofread by : PSA Easwaran

Description/comments : Datta Gopala Krishna, Pammal, Chennai 9442252443

Source : kalyANamanjarI dvitIya bhAgaH rAdhAkalyaNam

Acknowledge-Permission: Svarna Prakashanam

Latest update : May 14, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2022

*sanskritdocuments.org*

shrIrAdhAstutiH

# श्रीराधास्तुतिः

॥ श्रीराधा॥

मूलप्रकृतिरेका सा पूर्वब्रह्मस्वरूपिणी ।
सृष्टौ पञ्चविधा सा च विष्णुमाया सनातनी ॥

प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः ।
सर्वासां प्रेयसी कान्ता सा राधा च प्रकीर्तिता ॥

ब्रह्मवैवर्तपुराण ब्रह्म खण्ड अध्याय ३० १८१९
॥ श्रीराधा॥

श्रीदेवीभागवतम्
गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती ।
सावित्री च सृष्टिविधौ प्रकृतिः पञ्चधा स्मृता ॥

स्का । ९। अ४ - ४
पञ्चप्राणाधिदेवी या पञ्चप्राणस्वरूपिणी ।
प्राणाधिकप्रियतमा सर्वाभ्यः सुन्दरी परा ॥

सर्वयुक्ता च सौभाग्यमानिनी गौरवान्विता ।
वामाङ्गार्धस्वरूपा च गुणेन तेजसा समा ॥

परावरा सारभूता परमाद्या सनातनी ।
परमानन्दरूपा च धन्या मान्या च पूजिता ॥

रासक्रीडाधिदेवी श्रीकृष्णस्य परमात्मनः ।
रासमण्डलसम्भूता रासमण्डलमण्डिता ॥

रासेश्वरी सुरसिका रासवासनिवासिनी ।
गोलोकवासिनी देवी गोपीवेषविधायिका ॥

परमाह्लादरूपा च सन्तोषहर्षरूपिणी ।

निर्गुणा च निराकारा निर्लिप्ताऽऽत्मस्वरूपिणी ॥

निरीहा निरहङ्कारा भक्तानुग्रहविग्रहा ।
वेदानुसारिध्यानेन विज्ञाता सा विचक्षणैः ॥

दृष्टिदृष्टा न सा चेशैः सुरेन्द्रैर्मुनिपुङ्गवैः ।
वह्निशुद्धांशुकधरा नानालङ्कारभूषिता ॥

कोटिचन्द्रप्रभा पुष्टसर्वश्रीयुक्तविग्रहा ।
श्रीकृष्णभक्तिदास्यैककारा च सर्वसम्पदाम् ।
अवतारे च वाराहे वृषभानुसुता च या ।
यत्पादपद्मसंस्पर्शात्पवित्रा च वसुन्धरा ॥

ब्रह्मादिभिरदृष्टा या सर्वैर्दृष्टा च भारते ।
स्त्रीरत्नसारसम्भूता कृष्णवक्षःस्थले स्थिता ॥

यथाम्बरे नवघने लोला सौदामिनी मुने ।
षष्टिवर्षसहस्राणि प्रतप्तं ब्रह्मणा पुरा ॥

यत्पादपद्मनखरदृष्टये चात्मशुद्धये ।
न च दृष्टं च स्वप्नेऽपि प्रत्यक्षस्यापि का कथा ॥

तेनैव तपसा दृष्टा भुवि वृन्दावने वने ।
कथिता पञ्चमी देवी सा राधा च प्रकीर्तिता ॥

श्रीदेवीभागवतं स्कन्धः ९ - अ-१ श्लोकाः ४३ - ५७

इति राधास्तुतिः सम्पूर्णा ।

From kalyANamanjarI, dvitIya bhAgaH rAdhAkalyaNam
sangrahItaM rA. dattagopAlakRRiShNaH, svarNaprakAshanam

Proofread by PSA Easwaran

*shrIrAdhAstutiH*

pdf was typeset on October 30, 2022

Please send corrections to *sanskrit@cheerful.com*